# Shri Kamalamba Navavarana Stotram

# श्रीकमलाम्बानवावरणस्तोत्रम्

## Document Information

Text title : Kamalamba Navavarana Stotram

File name : kamalAmbAnavAvaraNastotram.itx

Category : devii, puShpAshrIvatsan, devI

Location : doc_devii

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Latest update : October 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

October 12, 2021

*sanskritdocuments.org*

# श्रीकमलाम्बानवावरणस्तोत्रम्

। ॐ ।

श्रीरामजयम् ।

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ॥

ॐ श्रीचक्रिण्यै च विद्महे । ह्रींबीजायै च धीमहि ।
तन्नौ माता प्रचोदयात् ॥

अथ श्रीकमलाम्बानवावरणस्तोत्रम् ।

नवावरणचक्रेशि श्रीमातः कमलाम्बिके ।
श्रीदीक्षितार्यसङ्गीते सङ्गीतकविताप्रिये ॥ १॥

तोडीरागकृतिध्याते कररामशुकारमे(१) ।
कमलालयतीर्थेशि करुणारसपूरिते ॥ २॥

अरुणोदयसंकाशे तरुणारुणसत्पदे ।
अखण्डानन्दसम्पूर्णे परमानन्दमुक्तिदे ॥ ३॥

आनन्दभैरवीरूपे तामसासुरमर्दिनि ।
त्रैलोक्यमोहनावासे चक्रेश्वरि नमोस्तु ते ॥ ४॥

पार्श्वस्थकमलावाणि नित्यकल्याणि योगिनि ।
सर्वाशापरिपूरश्रीचक्रवासिनि हंसिनि ॥ ५॥

शङ्कराभरणे शक्ते मूकवाग्वरदायिनि ।
चक्रसंक्षोभणाकारे शोकापोहपदाम्बुजे ॥ ६॥

काम्भोजचरणे पूर्णे सर्वसौभाग्यदायिके ।
हिमवत्तनुजे गौरि ह्रींकारमन्त्रपूजिते ॥ ७॥

भैरवीकीर्तनानन्दे परे सर्वार्थसाधिके ।
बहिर्दशारचक्रस्थे दशशक्तिनमस्कृते ॥ ८॥

परमाद्वैतसंस्फूर्ते सच्चिदानन्दरूपिणि ।
नादरहस्यमर्मज्ञयोगिवृन्दसुरक्षणे ॥ ९॥

सर्वरक्षासुचक्रेशि सङ्गीतरसिके शिवे ।
वेणीजितसुपुन्नागवरालि वर्णमातृके ॥ १०॥

पाणीधृतेक्षुकोदण्डपाशाङ्कुशसुमशरे ।
वाणीसंमृदुमाधुर्ये एणीकटाक्षवीक्षणे ॥ ११॥

सहानारागसङ्गीते सर्वरोगहरे वरे ।
परादिवाक्स्वरूपार्ये निरामयवरे परे ॥ १२॥

ह्लींकारमन्त्रगुप्तार्थे ह्लींकारमन्त्ररूपिणि ।
वाणीलज्ञितवीणार्ये वीणासुनादवादिनि ॥ १३॥

मुक्तिघण्टारवावासे श्रीकमलाम्बिके शिवे ।
अखण्डैकरसावाहे सर्वसिद्धिप्रदायिके ॥ १४॥

आहिरीरागसन्नूते सर्वानन्दमयेश्वरि ।
काद्यादिमन्त्ररूपे श्रीमहात्रिपुरसुन्दरि ॥ १५॥

श्रीमातः श्रीपुरान्तस्थचिन्तामणिगृहस्थिते ।
ब्रह्मानन्दप्रकाशे श्रीराजराजेश्वरि शुभे ॥ १६॥

श्रीचक्रेश्वरि मातः श्रीललिते भुवनेश्वरि ।
श्रीरागरागसङ्गीते राजयोगिनि सौभगे ॥ १७॥

सङ्गीतवरदे मातः सङ्गीतरसमञ्जरि ।
सङ्गीतश्लोकसान्निध्ये नमामि परदेवते ॥ १८॥

मङ्गलं कमलाम्बायै श्रीचक्रेश्यै सुमङ्गलम् ।
नवावरणगेयायै श्रीकर्यै शुभमङ्गलम् ॥ १९॥

अनुरागकृतं स्तोत्रं बालालापं तवार्पणम् ।
स्वीकुरुष्व मदम्बे श्रीर्गानवरं प्रदेहि मे ॥ २०॥

त्यागराजगुरुस्वामिशिष्यापुष्पासुगीतिकम् ।
नवावरणसुस्तोत्रं कमलाम्बाकृपावहम् ॥ २१॥

इति सद्गुरुश्रीत्यागराजस्वामिनः शिष्यया भक्तया पुष्पया कृतं

श्रीकमलाम्बानवावरणस्तोत्रं गुरौ समर्पितम् ।
ॐ शुभमस्तु ।

Footnote :

(1) delighting in the parrot in hand repeating "RAma RAma"

Encoded and proofread by N V Vathsan nvvathsan at gmail.com

Copyright Pushpa Srivatsan

*Shri Kamalamba Navavarana Stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on October 12, 2021

Please send corrections to *sanskrit@cheerful.com*